International Journal of Sanskrit Research 2021; 7(1): 300-303

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 300-303
© 2021 IJSR
www.anantaajournal.com
Received: 23-10-2020
Accepted: 29-11-2020

**मौमिता–खाण्डा**
शोधछात्रा,
विद्यासागरविष्वविद्यालयस्य,
विद्यासागर विश्वविद्यालय, मिदनापुर,
पश्चिम मिदनापुर, पश्चिम बंगाल,
भारत

**Corresponding Author:**
**मौमिता–खाण्डा**
शोधछात्रा,
विद्यासागरविष्वविद्यालयस्य,
विद्यासागर विश्वविद्यालय, मिदनापुर,
पश्चिम मिदनापुर, पश्चिम बंगाल,
भारत

# वैयाकरणसिद्धान्तकौमुद्याः परिभाषाप्रकरणवहिर्भूतानां परिभाषासूत्राणां परिभाषात्वं प्रयोगक्षेत्रञ्च

**मौमिता–खाण्डा**

**सन्दर्भः–**
वेदपुरुषस्य मुखं खलु व्याकरणम्, उच्यते– 'मुखं व्याकरणं स्मृतम'[1]। 'व्याक्रियन्ते व्युत्पाद्यन्ते षब्दाः अनेनेति व्याकरणम्। एतेषु सर्वोत्तमं सर्वश्रेष्ठं च व्याकरणं पाणिनिव्याकरणम्। महर्षिणा पाणिनिना विरचितो व्याकरणग्रन्थो हि 'अष्टाध्यायी'। अष्टाध्यायीग्रन्थे चत्वारः पादाः, प्रायः ४००० सूत्राणि विद्यन्ते। सूत्रात्मकपरम्परायां महर्षिपाणिनेः 'अष्टाध्यायी' मस्तकमणिरूपेण अवस्थीयते। कुमारिलभट्टेन तन्त्रवार्तिके उक्तम्–

"सूत्रेष्वेव हि तत् सर्वं यद्वृत्तौ यच्च वार्तिके।
सूत्रं योनिरिहार्थानां सर्वं सूत्रं प्रतिष्ठितम्"[2]।।

सूत्रमिदं षट्प्रकारकम्। यथा – संज्ञा, परिभाषा, विधिः, नियमः, अतिदेषः, अधिकारष्च। उच्यते–

"संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेषोऽधिकारष्च षड्विधं सूत्रलक्षणम्"।।

केचन तु प्रतिषेधः, अनुवादः, विभाषा, निपातनञ्चेति चतुष्टयं सूत्रलक्षणं संयुज्य दषधा सूत्रलक्षणमिति वदन्ति।

**कूट शब्दः** वैयाकरणसिद्धान्तकौमुद्याः, वेदपुरुषस्य, प्रतिषेधः, अनुवादः, विभाषा

## प्रस्तावना

### परिभाषासूत्रम्–

षड्विधेषु सूत्रेषु अनन्यवैषिष्ट्यात्मकं सूत्रं हि परिभाषासूत्रम्। 'परिभाषा'षब्दस्य व्युत्पत्तिर्हि–'परितः सर्वतो भाष्यतेऽनया' इति परिभाषा। पदमञ्जर्यां निगदितम्–
'परितः, सर्वतः, पूर्वत्र, परत्र, व्यवहिते च अनन्तरे च भाष्यते कार्यमनयेति'।
न्यासकार आह 'परितो व्यापृता भाषा परिभाषा'। परिभाषा तु सूत्रार्थनिर्धारणे सहायतां करोति। अन्यसम्भाव्यार्थतः अपसृत्य यथोचितार्थे विधिं संयोजयति। अतः उच्यते– 'अनियमे नियमकारिणी परिभाषा'। वैयाकरणाः वदन्ति येन विधिना षास्त्रस्य ग्राहकत्वं स्वीक्रियते, तदेव परिभाषासूत्रम्। उक्तं यत् 'साक्षात् विधिषास्त्रतात्पर्यग्राहकत्वं परिभाषासूत्रत्वम्'। परिभाषायाः उपयोगितासम्बन्धे उच्यते–

"दीपो यथा प्रभाद्वारा सर्वगेहप्रकाषकः।
परिभाषा तथा बुद्ध्या सर्वषास्त्रोपकारिका"।।

अर्थात् परिभाषा एकदेषे स्थित्वापि सर्वं षास्त्रमभिज्वलयति प्रदीपवत्।
महर्षिपाणिनेः इमानि ४००० सूत्राणि प्रकरणानुसारेण सुसज्जीकृत्य भट्टोजीदीक्षितो व्याख्यातवान्। अस्य ग्रन्थो हि वैयाकरणसिद्धान्तकौमुदी। ग्रन्थस्यास्य संज्ञापरिभाषादीनि बहुनि प्रकरणानि सन्ति। एतेषु परिभाषाप्रकरणे बहुनि परिभाषासूत्राणि सन्ति, यथा क. इको गुणवृद्धी, ख. अचष्च, ग. आद्यन्तौ टकितौ, घ. मिदचोऽन्त्यात् परः इत्यादयः।

परन्तु सिद्धान्तकौमुद्याम् एतानि व्यतीत्य अन्यानि कानिचित् परिभाषासूत्राणि परिलक्ष्यन्ते। एतेषां परिभाषात्वप्रयोगस्थलयोः वर्णनमेव अस्य षोधपत्रस्य आलोच्यविषयः। परिभाषाप्रकरणवहिर्भूतानि परिभाषासूत्राणि यथा–

क. एच इग्घ्रस्वादेषे (1/1/48)
ख. उरण्रपरः(1/1/52)
ग. प्रत्ययलोपे प्रत्ययलक्षणम्(1/1/62)
घ. यथासंख्यमनुदेषः समानाम्(1/3/10)
ङ. विप्रतिषेधे परं कार्यम्(1/4/2)
च. समर्थः पदविधिः(2/1/1)
छ. परष्च(3/1/2)
ज. आद्युदात्तष्च(3/1/3)
झ. वाऽसरूपोऽस्त्रियाम्(3/1/94)
ञ. अनुदात्तं पदमेकवर्जम्(6/1/152)

## क. एच इग्घ्रस्वादेषे (1/1/48)

व्याकरणषास्त्रे विधीयमानेषु कार्येषु एककार्यं हि ह्रस्वादेषविधानम्। ह्रस्वादेष इत्युक्तेः दीर्घस्थाने ह्रस्वादेषो बोध्यते। यथा आ–कारस्य स्थाने अकारः, ई–कारस्य स्थाने इकारः, ऊ–कारस्य स्थाने उकारः इत्यादयः। परन्तु एचोऽर्थात् ए,ओ,ऐ,औ–इत्येषां ह्रस्ववर्णो नास्ति, तथापि षास्त्रे एचो ह्रस्वविधानं क्रियते। अतः आषङ्का भवति यत् यदि एचो ह्रस्वविधानं कुर्यात् तर्हि कस्य वर्णस्यादेषो भवेत्? पञ्चह्रस्ववर्णाः सन्ति यथा– अ,इ,उ,ऋ,लृ इति। एचः इत्यत्र चत्वारो दीर्घवर्णाः तथा स्थानिनः सन्ति, यथा– ए,ओ,ऐ,औ। आदेषस्थानिनो यतः समसंख्या नास्ति, अतो 'यथासंख्यमनुदेषः समानाम्' इति परिभाषा प्रवर्तितुं न षक्नोति। उच्चारणस्थानगतान्तर्यानुसारेण ए,ऐ–इत्यनयोः स्थाने इ,अ इत्येतौ ओ,औ–इत्यनयोः स्थले च उ,अ इत्येतौ ह्रस्ववर्णौ भवेताम्।

तथापि स्पष्टतया न बोध्यते कस्य स्थाने को ह्रस्ववर्णो भवेदिति? आलोच्यपरिभाषयैव अत्र नियम्यते यत् एचः स्थाने इक् ह्रस्वादेषो भवतीति, अर्थात् ए,ऐ इत्यनयोः स्थाने 'इ', ओ औ इत्यनयोः स्थाने च उ–ह्रस्वादेषो भवत्येव, न तु अ–कारः।

ह्रस्वादेषविधाने एचो बहुविकल्पानां प्राप्तित्वात् अनियमो जायते, परन्तु आलोच्यसूत्रं यतो निष्चिततया एकस्य विकल्पस्य विधानं करोति, अतः परिभाषासूत्रमिदम्।

उदा– प्र–द्यो षब्दो नपुंसकः। अतो 'ह्रस्वो नपुंसके प्रातिपदिकस्य[3]' इति सूत्रेण अजन्तस्य प्रद्यो–षब्दस्य ह्रस्वविधानं भवति। तदा 'एच इग्घ्रस्वादेषे' इति नियमेन प्रद्यो–षब्दस्य ओकारस्थाने उ–कारादेषे प्रद्युषब्दो निष्पन्नो भवति।

## ख. उरण्रपरः (1/1/52)

र–प्रत्याहारविधायकं सूत्रमिदम्। चतुर्दषमाहेष्वरसूत्रेषु 'हयवरट्' इति पंचमसूत्रस्य र–कारेण सह 'लण्'– इति सूत्रस्य अकारः संयुज्य र–प्रत्याहारो निर्मीयते। अनेन र,ल इति द्वयोः वर्णयोः बोधो भवेत्। सूत्रेऽस्मिन् उच्यते यत् ऋ–कारस्य स्थाने योऽण् विधीयते, स रपरः सन्नेव प्रवर्तते। ऋ–कारेण अष्टादष ऋकाराः, द्वादष लृकाराष्च बोध्यन्ते। अपि च अण् इत्युक्ते अ,इ,उ वर्णाः बोध्यन्ते। सूत्रेणानेन एतद्विधीयते यत्–

ऋ–कारस्य स्थाने योऽणादेषो भवेत् स रपरः, लृ–कारस्य स्थाने च योऽण् आदिष्यते स ल–परो भवतीति। अर्थात् ऋ–कारस्य स्थाने अकारः प्राप्यते चेत् अर् अल् वा भवति, इ–कारः प्राप्यते चेत् इर् इल् वा भवति, उ–कारः प्राप्यते चेत् उर् उल् वा भवति।

उदा– कृष्ण ऋद्धिः – इत्यत्र अवर्णात् ऋ–कारे(अचि) परे सति 'स्थानेऽन्तरतमः'[4] सूत्रसहायेन 'आद्गुणः'[5] इति सूत्रेण पूर्वपरयोः स्थाने गुणैकादेषे अ–कारो भवति, इत्यवस्थायाम् 'उरण्रपरः'इति सूत्रेण अ–कारस्य रपरत्वे कृष् अर् द्धिः = कृष्णर्द्धिः इति भवति। एवमेव तव लृकारः = तव् अल् कारः = तवल्कारः। अस्याः परिभाषायाः प्रभावेन कृष्णर्द्धिः, तवल्कारः इत्यादिस्थलेषु ऋकारस्य स्थाने प्राप्तः अण् रपरो भूत्वा प्रयुज्यते। अन्यथा कृष्णर्द्धिः इत्यस्य स्थले कृष्णद्धिः, तवल्कारः इत्यस्य स्थले तवकारः इति अनिष्टरूपापत्तिः जायते।

मूलतः यत्र यत्र ऋलृकारयोः स्थाने अणादेषः प्राप्येत, तत्र तत्र 'उरण्रपरः' सूत्रमिदं प्रवर्तते। यथा– 'उरत्', 'आद्गुणः', 'अचो ञ्णिति', 'सार्वधातुकार्धधातुकयोः' इत्यादिसूत्रेषु सूत्रस्यास्य प्रवृत्तिर्भवति। एकदेषस्थितं सत् यतः बहुषास्त्राणि प्रदीपवत् प्रज्ज्वलयति, अतः परिभाषासूत्रमिदम्।

## ग. प्रत्ययलोपे प्रत्ययलक्षणम्(1/1/62)

पाणिनीयव्याकरणषास्त्रे लोपस्यार्थो हि अदर्षनम्, न तु नाषः। अतः सर्वथा वर्णो न विनष्यति। अत्र प्रष्नो भवति यत् यदि प्रत्ययविधानादनन्तरमेव सर्वापहारलोपो भवेत्, तर्हि कथं प्रत्ययस्य विधानमभवत्? उच्यते– यथा निर्माणादनन्तरं गृहे विनष्टेऽपि तत्स्थले पतितम् उपादानादिकं सूचयति यत् अत्र पूर्वमेव गृहमासीत्, तथैव प्रत्ययलोपादनन्तरमपि स्थानिवद्भावात् अथवा 'प्रत्ययलोपे प्रत्ययलक्षणम्'इति सूत्रबलात् तत्र प्रत्ययनिमित्तं कार्यं भवेदिति।

'प्रत्ययः लक्षणं निमित्तं यस्य तत् प्रत्ययलक्षणम्'। प्रत्ययनिमित्तं यत् कार्यं तत् प्रत्ययलोपेऽपि भवत्येव, अर्थात् प्रत्यये लुप्तेऽपि तन्निमित्तं कार्यं न बाध्येत इति। यद्यपि 'स्थानिवदादेषोऽनल्विधौ'इति सूत्रानुसारेण लोपस्य स्थानिवद्भावात् प्रत्ययनिमित्तं कार्यं सम्भवति, तथापि प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रमिदं व्यर्थं न भवति। यतो हि स्थानिवत्सूत्रम् अनेकाल्विषयकम्, परन्तु आलोच्यसूत्रं भवति अल्मात्रविषयकम् अर्थात् प्रत्ययो यदि एकवर्णात्मकमपि भवति, तर्हि तन्निमित्तकं कार्यं भवेत्, यत्तु स्थानिवद्भावनियमेन न सिध्यति। मूलतः अल्विषयकप्रत्ययनिमिकार्यसम्पादनार्थं परिभाषेयं विरचिता।

उदा– यथा लिह्धातोरुत्तरं क्विप्प्रत्यये सर्वापहारलोपे 'लिह्' भवति। ततः प्रातिपदिकसंज्ञायां, प्रथमाविभक्तौ एकवचनविवक्षायां सु–विभक्तियोगे अनुबन्धलोपे लिह् स् इति स्थिते, 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'[6] इत्यनेन सूत्रेण सः लोपे 'लिह्' इति रूपं प्राप्यते। अत्र स्–कारस्य लोपेऽपि 'प्रत्ययलोपे प्रत्ययलक्षणम्' इत्यनेन लिह् सुबन्तरूपेण स्वीकृत्य 'सुप्तिङन्तं पदम्' इति सूत्रेण पदसंज्ञको भवति। अतः 'हो ढः' इत्यनेन पदान्तस्य हकारस्य स्थाने ढ–आदेषे 'लिढ्' इति भवति। ततः 'झलां जषोऽन्ते' इति सूत्रेण जष्त्वे लिड् इति, पक्षे 'वावसाने' इति सूत्रेण विकल्पे चर्त्वे लिट् इति रूपं सिद्धम्।

अत्र दृष्यते यत् सुप्–प्रत्ययलोपात् अनन्तरमपि 'लिह्'पदं स्यात्। अन्यथा 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति परिभाषायाः अभावे लिह् पदसंज्ञको न भवेत्, तदा लिड्, लिढ्, लिट् इत्यादिरूपाणि न सिद्ध्यन्ते। अतः अत्र आलोच्यसूत्रं प्रवर्तेत। लुप्तेऽपि प्रत्यये प्रत्ययभूतकार्यं भवेदिति विषये अनया परिभाषया नियम्यते। अपि च निर्दिष्टस्थलेषु एव परिभाषेयं प्रवर्तेत इति।

केचन मन्यते नियमसूत्रमिदम्। नियमसूत्रस्यास्य नियमो हि 'यत्र प्रत्ययस्यासाधारणं रूपं प्रयोजकं तदेव कार्यं प्रत्ययलोपे सति भवति नियमार्थं चेति भाष्यादिषु स्पष्टम्'।

## घ. यथासंख्यमनुदेषः समानाम्(1/3/10)

स्मानसंख्याविषिष्टो विधिः यथाक्रमं भवतीति। अर्थात् यत्र स्थान्यादेषयोः अथवा स्थानिनिमित्तयोः आदेषनिमित्तयोः वा समानसंख्या तत्र आलोच्यसूत्रस्य प्रवृत्तिः भवति। अत्रेदं तात्पर्यं यत् यदि स्थान्यादेषयोः संख्या समाना भवेत्, तर्हि स्थानिनः एकस्मिन् स्थले युगपत् सुसज्जीकृत्य क्रमेण प्रथमद्वितीयतृतीयचतुर्थादिरूपेण स्वीकुर्यात्। पुनः आदेषाः अपि एकस्मिन् स्थले युगपत् सज्जिताः सन्तः क्रमेण प्रथमद्वितीयतृतीयचतुर्थादिरूपेण स्वीक्रियन्ते। ततः क्रमेण अन्वयो भवति। अर्थात्–

प्रथमस्थानिनः स्थले प्रथमादेषो भवेत्।
द्वितीयस्थानिनः स्थले द्वितीयादेषो भवेदित्यादयः।

यथा– 'एचोऽयवायावः'[7] इति सूत्रम्। अत्र एच् भवति स्थानी अर्थात् ए,ओ,ऐ,औ इति चत्वारः स्थानिनः, आदेषा अपि चत्वारः अर्थात्

'अय्','अव्','आय्','आव्'च। अतः आदेषकाले–ए स्थाने अय्, ओ स्थाने अव्, ऐ स्थाने आय्, औ स्थाने आव् भवति।

मूलतः 'हरे ए'– इत्यस्मिन् स्थले एकारे (अचि) परे सति हरे इत्यस्य एकारस्य (एचः) स्थाने 'एचोऽयवायावः' इति सुत्रानुसारेण अयवायावादेषानां प्राप्तिः जायते। अत्र दृष्यते स्थानी भवति एक एव। अर्थात् हरे इत्यस्य रकारोत्तरवर्ती एकारः, अपि च चत्वारः आदेषाः सन्ति, यथा अय्, अव्, आय्, आव् इति। एकस्य स्थानिनः स्थाने चतुर्णाम् आदेषानां प्राप्तौ अनियमो जायेत। अनियमे सति नियमार्थं 'यथासंख्यमनुदेषः समानाम्' सूत्रमिदमत्र प्रवर्तते।

अनेन सूत्रेण निर्दिष्यते यत् 'हरे' इत्यस्य एकारो यतः प्रथमस्थानी, अतः आदेषेषु प्रथमादेषः अर्थात् अयादेषे हर् अय् ए = हरये इति रूपं प्राप्यते। अनियमे नियमार्थं 'परिभाषासूत्रमिदम्'।

## ङ. विप्रतिषेधे परं कार्यम्(1/4/2)

अष्टाध्यायाः क्रमानुसारेण यत् सूत्रं परं विद्यते, तत् परसूत्रम्, अपि च तेन सूत्रेण विधीयमानं कार्यं हि परकार्यम्। अन्यत्र लब्धावकाषयोः द्वयोः षास्त्रयोः एकत्र लक्ष्ये युगपदुपस्थितिरेव तुल्यबलविरोधः। उच्यते–

'अन्यत्रान्यत्र लब्धावकाषयोः एकत्र प्राप्तिस्तुल्यबलविरोधः'। आलोच्यसूत्रेण नियमः क्रियते यत् तुल्यबलविरोधे सति अष्टाध्यायीक्रमेण परसूत्रं तद्विहितकार्यंच श्वेदिति।

उदा– 'सुपि च'(7/3/102), 'बहुवचने झल्येत्'(7/3/103)च। रामाभ्याम्– इत्यत्र रामषब्दात् उत्तरं तृतीयाविभक्तेः द्विवचने भ्याम् प्रत्यययोगे 'राम भ्याम्' इति स्थिते 'सुपि च' इति सूत्रेण अदन्तांगस्य दीर्घादेषे 'रामाभ्याम्' इति भवति। रामेषु इत्यत्र रामषब्दात् उत्तरं सप्तमीविभक्तेः बहुवचने सुप्प्रत्यययोगे राम सुप् इति जाते 'बहुवचने झल्येत्' इति सूत्रेण मकारोत्तरवर्तिनः अकारस्य स्थाने एकारादेषे 'रामेषु'इति।

रामेषु, रामाभ्याम् इत्यनयोः स्थलयोः अवकाषप्राप्तयोः 'सुपि च', 'बहुवचने झल्येत्' इति द्वयोः सूत्रयोः युगपत् 'रामेभ्यः' इत्यत्र प्राप्तिर्जायते। अर्थात् रामषब्दस्य चतुर्थीविभक्तौ बहुवचने 'भ्यस्'प्रत्यययोगे 'राम भ्यस्' इत्यवस्थायां द्वयोः सूत्रयोः प्राप्तिर्भवति। यथा–

1. यञादौ 'भ्यस्' इति सुप्प्रत्यये परे सति 'सुपि च' सूत्रेण राम इति अदन्तांगस्य दीर्घादेषः प्राप्यते।
2. भ्यस् इति झलादौ बहुवचनसुब्विभक्तौ परे राम इति अदन्तांगस्य एकारादेषः प्राप्यते।

एकत्र द्वयोः सूत्रयोः प्राप्तित्वात् सन्देहो जायते यत् अत्र किं तावत् सूत्रं प्रवर्तेत? सन्देहनिरसनाय आलोच्यसूत्रं प्रवृत्तं सत् निर्दिषति उक्तस्थले तुल्यबलविरोधे सति 'बहुवचने झल्येत्' इति परविधिः तद्विहितकार्यंच बलवद्भवति। तदा अदन्तांगस्य रामषब्दस्य अकारस्थाने एकारादेषे 'रामेभ्यः' इति भवति। सन्देहविषये नियमप्रदानात् परिभाषासूत्रमिदम्।

## च. समर्थः पदविधिः (2/1/1)

परिभाषासूत्रमिदम्। सूत्रेऽस्मिन् उच्यते– पदसम्बन्धे यद्विधानं तत् समर्थषब्दं समर्थपदं वाश्रित्य भवति। उच्यते च दीक्षितमहोदयेन–

'पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः'।

आकाङ्क्षायोग्यतादिभिः पदार्थेषु परस्परसम्बन्धस्थापनयोग्यता हि सामर्थ्यम्। यथा– 'सुवर्णस्य' इत्युक्ते आकाङ्क्षा जायते सुवर्णस्य किम्? उत्तरे उक्तम्– कङ्कणम्। अत्र सुवर्णकङ्कणे पदे परस्परम् आकाङ्क्षायुक्ते, अर्थात् अनयोः पदयोः सामर्थ्यमस्ति। सामर्थ्यं द्विविधम्– व्यपेक्षा एकार्थीभावष्च। वाक्ये पदानां परस्परान्वययोग्यता हि व्यपेक्षारूपसामर्थ्यम्। अपि च समासनिर्माणात् परं समस्तपदैः यो विषिष्टार्थः प्राप्यते स एकार्थीभावरूपसामर्थ्यम्। एवमेव कृत्तद्धितादिप्रत्ययसम्बन्धिकार्यमपि पदकार्यम्, अतः इदमपि समर्थपदाश्रितम्।

मूलतः आलोच्यसूत्रेण नियम्यते यत् कृत्स्नपाणिनीयाष्टाध्यायीग्रन्थे यदि कस्यचित् पदसम्बन्धविधेः विधानं भवेत्, तर्हि स विधिः समर्थपदमाश्रित्य विधीयेत, न तु असमर्थपदम्। अन्यथा 'भार्या सुवर्णस्य कङ्कणं राज्ञः' इत्यत्र सामर्थ्याभावेऽपि सुवर्णेन सह भार्यायाः, कङ्कणस्य राज्ञा सह अन्वयो भवेदिति, यत्तु असंगतमिति। कीदृषयोः पदयोः पदानां वा मध्ये पदसम्बन्धिकार्यं भवेत् तद्विषये नियमविधानात् परिभाषासूत्रमिदम्।

## छ. परष्च(3/1/2)

'प्रत्याययतीति प्रत्ययः'। प्रकृत्या सह संयुज्य यः षब्दनिर्माणे पदसंघटने वा सहायतां करोति स प्रत्ययः। 'प्रत्ययः'[8] इति सूत्रेणैव प्रत्ययसंज्ञा विधीयते, परन्तु तस्यावस्थानं कुत्र भवेत्तद्विषये किमपि नोक्तम्। अतः संषयो भवति यत् स प्रत्ययः किं प्रकृतेः परं विधीयते उत पूर्वम्? सन्देहस्यास्य निराकरणाय 'परष्च' सूत्रमुपस्थित्य नियमं करोति यत् प्रत्ययः प्रकृतेः परमेव विधीयेत अवस्थीयेत च।

अर्थात् यस्याः प्रकृतेः प्रत्ययो विधीयते, तस्याः उत्तरमेव स प्रत्ययसंज्ञकोऽवस्थीयते। उच्यते– 'प्रत्ययः पूर्वो भवति परो वेति अनियमेन अध्याहारे प्रसक्ते पर एवेति नियमार्थं सूत्रारम्भः'। अतः परिभाषासूत्रमिदम्।

उदा– 'अचो यत्' इत्यनेन सूत्रेण उच्यते यत् अजन्ताद्धातोः यत्प्रत्ययः स्यात्। अतः आलोच्यपरिभाषासहायेन अत्र अजन्ताद्धातोः परमेव यत्प्रत्ययो भवति। यथा– चि+यत्=चि+य=चेयम्।

आपञ्चमपरिसमाप्तेरधिकृतत्वात् इदमधिकारसूत्रमपि वर्तते।

## ज. आद्युदात्तष्च(3/1/3)

वेदे स्वरः अतीव गुरुत्वपूर्णविषयः। आलोच्यसूत्रेण प्रत्ययस्य स्वरसम्बन्धे विधानं क्रियते यत् प्रत्यय आद्युदात्त एव भवति। अनियतस्वरोऽथवा अव्यवस्थितस्वरः यस्य प्रत्ययस्य तस्य प्रसंगे आद्युदात्तस्य विधानार्थं परिभाषेयं विरचिता।

मूलतः बहुस्वरविषिष्टस्य प्रत्ययस्य कस्मिन्नंषे कः स्वरो भवेत् तद्विषये सन्देहे जाते आलोच्यपरिभाषया नियम्यते यत् आदेः स्वरस्य एव उदात्तत्वं भवेत्, मध्येऽन्ते च उदात्तो न भवेदिति। अनियमे नियमविधानात् परिभाषासूत्रमिदम्।

उदा– गत्यर्थात् अगिधातोः 'अंगेर्नलोपष्च'इति औणादिकसूत्रेण नि–प्रत्ययः, इदित्त्वान्नुमागमेन प्राप्तस्य नकारस्य लोपे अग् नि= अग्निः इति भवति। 'आद्युदात्तष्च' इति सूत्रेण निप्रत्ययस्य इकार उदात्तो भवति।

आलोच्यपरिभाषायाः अभावे तु प्रत्ययस्य आदिस्वरं व्यतीत्य मध्यस्वरः, अन्तस्वरोऽपि उदात्तो भवेत्। यत्तु असंगतम्। यतो हि वेदे प्रतिपदं स्वरतो वर्णतष्च यथार्थतया प्रयुज्येत।

## झ. वाऽसरूपोऽस्त्रियाम्(3/1/94)

सूत्रं द्विविधम्, यथा उत्सर्गसूत्रमपवादसूत्रञ्च। येन सूत्रेण सामान्यतया कार्यं विधीयते, तत् उत्सर्गसूत्रम्, अपि च येन सूत्रेण विषेषतया कार्यं सम्पाद्यते, तत्तु अपवादसूत्रम्। नियमोऽस्ति यत् अपवादसूत्रं नित्यतया उत्सर्गसूत्रं बाधते। यथा 'आतोऽनुपसर्गे कः' इति अपवादसूत्रेण 'कर्मण्यन्' उत्सर्गसूत्रं नित्यं बाधितं भवति।

परन्तु कृत्यप्रकरणे 'धातोः'[9] इति सूत्रस्य अधिकारे विद्यमानेषु सूत्रेषु परिलक्ष्यते यत् कुत्रापि विषेषसूत्रेण सामान्यसूत्रं नित्यं बाधते, कुत्रापि च विकल्पे बाधते, पक्षे तु न बाधते इति। यथा 'तव्यत्तव्यानीयरः'इति सामान्यसूत्रेण सामान्यतया सर्वेषां धातूनामुत्तरं तव्यत्तव्यानीयर्प्रत्ययाः विधीयन्ते। एते तु सामान्यप्रत्ययाः। पुनः 'अचो यत्' इति अपवादसूत्रेण विषेषतया अजन्तधातोरुत्तरं यत् प्रत्ययो विधीयते। अतः यत् विषेषप्रत्ययः। अत्र तु अपवादविषयेऽपि उत्सर्गप्रत्ययानां तथा उत्सर्गसूत्रस्य प्रवृत्तिः लभ्यते। अर्थात् यथा– भूधातोरुत्तरं यत्प्रत्यययोगे 'भव्यम्'इति भवति, तथैव विकल्पे तव्यत्प्रत्यययोगे

भवितव्यमिति। भवति। एवमेव कृ+ण्यत्= कार्यम्, कृ+तव्यत्= कर्तव्यम्, कृ+अनीयर्= करणीयमिति भवति।
पुनः दृष्यते यत् 'ऋहलोर्ण्यत्' इति सूत्रेण विहितः ण्यत्–प्रत्ययः 'अचो यत्' सूत्रेण प्राप्तं यत्–प्रत्ययं बाधते। यतः 'ऋहलोर्ण्यत्'इति सूत्रेण अपवादसूत्रम्, 'अचो यत्'इति सामान्यसूत्रम्। अतः उपर्युक्तस्थलयोर्मध्ये अनियमः परिलक्ष्यते। एतदनियमनिवारणाय परिभाषेयं विरच्यते। अनया परिभाषया नियमः क्रियते यत् 'धातोः'इति सूत्रस्याधिकारे स्त्र्यधिकारविहितप्रत्ययं वर्जयित्वा ये तावत् असमानरूपापवादप्रत्ययाः सन्ति, ते उत्सर्गप्रत्ययानां वैकल्पिकबाधकाः भवन्तीति।
उपर्युक्तस्थले तव्यत्, तव्य, अनीयर्, यत्– एते असमानप्रत्ययाः सन्ति। अर्थात् अनुबन्धलोपात् परं तव्य, अनीय, य इति विद्यन्ते, अतः अत्र वैकल्पिकबाधो परन्तु ण्यत्, यत् (अनुबन्धलोपात् परं 'य' अवषिष्यते) भवति समानप्रत्ययौ, अतः नित्यबाधो भवतीति। एते प्रत्ययाः स्त्र्यधिकारे न वर्तन्ते। कुत्र नित्यबाधो भवेत्, कुत्र वैकल्पिकष्च एतद्विषये परिभाषया अनया नियम्यते।

### ञ. अनुदात्तं पदमेकवर्जम्(6/1/152)

वेदे स्वरस्तु त्रिविधः, यथा उदात्तः अनुदात्तः स्वरितष्च। 'आद्युदात्तष्च' इति सूत्रेण उदात्तस्वरस्य स्थानसम्बन्धे निर्दिष्यते। अथ प्रष्नो भवेत् अनुदात्तस्वरः कुत्र भवेत्? एतद्विषये आलोच्यसूत्रेणैव नियमः क्रियते। अर्थात् पदे यस्य वर्णस्य स्थाने उदात्तः स्वरितो वा स्वरो विधीयते, तं स्वरं वर्जयित्वा अन्ये ये वर्णाः सन्ति, ते अनुदात्तस्वरविषिष्टाः भवेयुरिति। स्वरविधिनियमविषया परिभाषेयम्। अस्वरितत्वात् न तु अधिकारसूत्रम्।
उदा– 'गोपायतं नः' इत्यस्मिन् स्थले 'सनाद्यन्ताः धातवः' इति सूत्रेण धातुत्वे सिद्धे धातुरूपेण यकारोत्तरवर्ती अकार उदात्तो भवति, तदा अन्ये स्वराः अनुदात्तात्मकाः भवन्ति। एवमेव स्थूलपृषती इत्यत्र 'स्थूला चासौ पृषती चेति' विग्रहेण कर्मधारयसमासो भवति चेत् 'समासस्य' इति सूत्रेण समासस्य अन्त्यस्वर उदात्तो भवति, तदा अन्ये च स्वराः अनुदात्तस्वरविषिष्टाः भवन्तीति।

### उपसंहारः

उपर्युक्तालोचनया एतत् स्पष्टतया अवगम्यते यत् 'एच इग्घ्रस्वादेषे' इत्यादीनि यानि दषपरिभाषासूत्राणि समुपलभ्यन्ते, तेषां परिभाषात्वे कारणं भवति अनियमे नियमविधानम्, तथा सन्देहविषये नियमप्रदानम्। अत्र आषङ्का भवति यत् नियमसूत्राणि अपि अनियमे नियमं कुर्वन्ति, अतः तान्यपि परिभाषासूत्राणि भवेयुः। उच्यते अत्र नियमपरिभाषासूत्रयोः मध्ये भेदोऽयं वर्तते यत् नियमसूत्राणि व्याकरणविहितकार्यं यथास्थाने निर्धारयन्ति, परन्तु परिभाषासूत्राणि अर्थनियमनं कुर्वन्ति। एताः परिभाषाः यतः पाणिनेः वचनरूपेण साक्षादुल्लिख्यन्ते, अतो वाचनिकीपरिभाषाः भवन्ति। व्याकरणषास्त्रे परिभाषाणामुपयोगिता सर्वकाले एव विद्यते। परिभाषायाः उपयोगिताविषये महाकविः माघः उक्तवान्–

> "परितः प्रमिताक्षरापि सर्वं विषयं प्राप्तवती गता प्रतिष्ठाम्।
> न खलु प्रतिहन्यते कुतष्चित् परिभाषेव गरीयसी यदाज्ञा।।"[10]
> न केवलं व्याकरणषास्त्रे, समाजविद्याविज्ञानदर्षनषास्त्रेषु परिभाषायाः अनन्यभूमिका परिलक्ष्यते।

### अन्तटीका–

1. पाणिनीयषिक्षा
2. तन्त्रवार्तिकम् 2/3
3. पा.सू. 1/2/47
4. पा.सू. 1/1/50
5. पा.सू. 6/1/87
6. पा.सू. 6/1/68
7. पा.सू. 6/1/78
8. पा.सू. 3/1/1
9. पा.सू. 3/1/91
10. षिषुपालवधम्16/80

### अनुषीलितग्रन्थञ्जी–

1. पाणिनिः, अष्टाध्यायी; सम्पा. तपनषङ्करभट्टाचार्यः, कलिकाता, संस्कृत वुक डिपो, 2012, पुनर्मुद्रितः।
2. पाणिनिः, अष्टाध्यायी; सम्पा. मदनमोहनझा
3. भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी(परिभाषाप्रकरणम्); सम्पा.करुणासिन्धुदासः, कलिकाता, संस्कृत पुस्तक भाण्डार, 2011, द्वितीयसंस्करणम्।
4. भट्टोजिदीक्षितः, प्रौढमनोरमा, सम्पा. जयषंकरलाल त्रिपाठी, वाराणसी, चौखाम्वा कृष्णदास अकादेमी, 2011 (पुनर्मुद्रितः)
5. भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी (अजन्तपुंलिंगप्रकरणम्); सम्पा.सत्यरञ्जनवन्द्योपाध्यायः, कलिकाता, संस्कृत पुस्तक भाण्डार, 2011, (द्वितीयसंस्करणम्)।
6. भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी(समासप्रकरणम्); सम्पा. सच्चिदानन्दमुखोपाध्यायः, कलिकाता, साहित्यनिकेतनम्, 2012... 2013 (पुनमुद्रितः)।
7. वरदाराजाचार्यः लघुसिद्धान्तान्तकौमुदी, सम्पा. रघुनाथषास्त्री, वाराणसी, चौखाम्वा सुरभारतीप्रकाषनम्, 2016 (संस्करणम्)
8. वैदिकव्याकरणम्, सम्पा. तपनषङ्करभट्टाचार्यः, कलिकाता, संस्कृत वुक डिपो, 2011, (द्वितीयसंस्करणम्)